# संस्कृत

## READINGS IN SANSKRIT
## PART 1

# WEEK ONE

DIAMOND MOUNTAIN UNIVERSITY

Readings in Sanskrit, 1
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

# Fall Term, Class Schedule

**WEEK ONE: Thursday, September 27, 2007 1:00 – 4:00 PM**

A. Review quiz
B. Review of homework from break (Bhagavad Gita, Chapter 1)
C. Introduction to Arya Nagarjuna's मूलमध्यमककारिका, chapter 18

**HOMEWORK:**

1. Provide a word by word English translation of Chapter 18 of Arya Nagarjuna's मूलमध्यमककारिका (see below).
2. Provide a word by word English translation of the verses from the भगवद् गीता below.

# मूलमध्यमककारिका

## आत्मपरीक्षा नामाष्टदशमं प्रकरणं

आत्मा स्कन्धा यदि भवेदुदयव्ययभाग्भवेत्।
स्कन्धेभ्यो ऽन्यो यदि भवेद्भवेदस्कन्धलक्षणः॥ १

आत्मन्यसति चात्मीयं कुत एव भविष्यति।
निर्ममो निरहंकारः शमादात्मात्मनीनयोः॥ २

निर्ममो निरहंकारो यश्च सो ऽपि न विद्यते।
निर्ममं निरहंकारं यः पश्यति न पश्यति॥ ३

ममेत्यहमिति क्षीणे बहिर्धाध्यात्ममेव च।
निरुध्यत उपादानं तत्क्षयाज्जन्मनः क्षयः॥ ४

कर्मक्लेशक्षयान्मोक्षः कर्मक्लेशा विकल्पतः।
ते प्रपञ्चात्प्रपञ्चस्तु शून्यतायां निरुध्यते॥ ५

आत्मेत्यपि प्रज्ञपितमनात्मेत्यपि देशितं।
बुद्धैर्नात्मा न चानात्मा कश्चिदित्यपि देशितं॥ ६

निवृत्तमभिधातव्यं निवृत्ते चित्तगोचरे।

अनुत्पन्नानिरुद्धा हि निर्वाणमिव धर्मता॥ ७

सर्वं तथ्यं न वा तथ्यं तथ्यं चातथ्यमेव च।

नैवातथ्यं नैव तथ्यमेतद्बुद्धानुशासनं॥ ८

अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितं।

निर्विकल्पमनानार्थमेतत्तत्त्वस्य लक्षणं॥ ९

प्रतीत्य यद्यद्भवति न हि तावत्तदेव तत्।

न चान्यदपि तत्तस्मान्नोच्छिन्नं नापि शाश्वतं॥ १०

अनेकार्थमनानार्थमनुच्छेदमशाश्वतं।

एतत्तल्लोकनाथानां बुद्धानां शाशनामृतं॥। ११

संबुद्धानामनुत्पादे श्रावकाणां पुनः क्षये।

ज्ञानं प्रत्येकबुद्धानामसंसर्गात्प्रवर्तते॥ १२

भगवद् गीता

कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन ।

इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ।। २.४

गुरूनहत्वा हि महानुभावान्

श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।

हत्वार्थकामांस्तु गुरूनिहैव

भुञ्जीय भोगान् रुधिरप्रदिग्धान् ।। २.५

न चैतद्विद्मः कतरन्नो बरीयो

यद्वा जयेम यदि वा नो जयेयुः ।

यानेव हत्वा न जिजीविषामः

तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः । २.६

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेता ।

यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥

२.७

न हि प्रप्श्यामि ममापनुद्याद्

यच्छोकमुच्छोषणमिन्द्रियाणाम् ।

अवाप्य भूमावसपत्नमृद्धं

राज्यं सुराणामपि चाधिपत्यम् । २.८

****

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।

स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ २.४०

****

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।

कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ ५.२३